THE

# TAITTIRĪYA ĀRAṆYAKA

*with the commentary of*

Bhaṭṭa Bhāskara Miśra

and an English Introduction by

T. N. Dharmādhikāri

Director, Vedic Saṁśodhana Maṇḍala, Pune

Edited by

A. MAHADEVA SASTRI

and

K. RANGACARYA

3 Vols. (Bound in one)

MOTILAL BANARSIDASS

*Delhi Varanasi Patna Madras*

# तैत्तिरीयारण्यकम्

भट्टभास्करभाष्योपेतम्

श्री टी० एन० धर्माधिकारिभिर्भूमिकया समलङ्कृतम्

श्री ए० महादेवशास्त्रिणा

श्री के० रङ्गाचार्येण च सम्पादितम्

त्रयो भागाः सम्मिलिताः

मोतीलाल बनारसीदास

दिल्ली वाराणसी पटना मद्रास

इस ग्रन्थ के प्रकाशन में सहायता प्रदान करने के लिये भिवानी निवासी श्री राधेश्याम शास्त्री के प्रति आभार सहित।

© मोतीलाल बनारसीदास

मुख्य कार्यालय : बंगलो रोड, जवाहर नगर, दिल्ली ११० ००७
शाखाएँ : चौक, वाराणसी २२१ ००१
अशोक राजपथ, पटना ८०० ००४
६ अपर स्वामी कोइल स्ट्रीट, मैलापुर, मद्रास ६०० ००४

पुनर्मुद्रण : दिल्ली, १९८५

मूल्य : रु० १५० (सजिल्द)
१२० (अजिल्द)

नरेन्द्र प्रकाश जैन, मोतीलाल बनारसीदास, दिल्ली-७ द्वारा प्रकाशित तथा शान्तिलाल जैन, श्री जैनेन्द्र प्रेस, ए-४५, फेज-१, नारायणा, नई दिल्ली-२८ द्वारा मुद्रित।

# INTRODUCTION

This edition of Taittirīya-Āraṇyaka, with the commentary of Bhaṭṭa Bhāskara, is a reprint of the earlier edition of this work brought out in the Government Oriental Library Series, Bibliotheca Sanskrita Nos. 26, 27 and 29 Mysore, in 1900-1902. In this edition the Taittirīya-Āraṇyaka has been divided into eight prapāṭhakas, further split up into anuvākas.

The tradition has briefly enlisted the contents of the Taittirīya Āraṇyaka of this school, as follows:—

> "hotṝn pravargyakāṇḍaṁ ca
> Yāś copaniṣado viduḥ //
> aruṇāmnyāyavidhīś caiva
> Kāṭhake parikīrtitāḥ //
> rudrā nārāyaṇaś caiva
> medho yaś caiva pitriyaḥ //
> etad āraṇyakaṁ sarvaṁ
> nāvratī śrotum arhati //"[1]

The contents of Āraṇyaka, according to the tradition are to be recited by a *Vratī*, in the midst of *araṇya* i.e. forest. The *Vratas* are elucidated as auxiliary to the Āruṇaketuka-cayana in I.32—*niyamaḥ samāsena...*, alongwith the injunction—*araṇye adhiyiran.*

The topics viz. Sāvitra-cayana, Nāciketa-cayana, Cāturhotṛ-cayana, Vaiśvasṛja-cayana; Āruṇaketuka-cayana, Divaḥśyeneṣṭayaḥ, Apāgheṣṭayaḥ and Svādhyāya-brāhmaṇam, have been assigned, according to tradition, to the school originated by the Sage Kaṭha. Out of these eight topics, first four cayanas, Divaḥśyeneṣṭayaḥ and Apāgheṣṭayaḥ have been incorporated in the text of the Taittirīya Brāhmaṇa (III.10-12) probably by way of appendix. Since the topics of Āruṇaketukacayana and Svādhyāya-Brāhmaṇa are expected to be recited in the forest, they appear to have been included in the text of Āraṇyaka. Thus the first prapāṭhaka dealing with Āruṇaketukacayana and the second

1. As cited by Bhaṭṭa Bhāskara and Sāyaṇācārya in the Introductions to their commentaries on Taittirīya Āraṇyaka.

ति । य एवं वेद ॥ ८९ ॥ वेद भवत्यायतनं भवति वेद वेदं तिष्ठति गुल्फदघ्नं चातुर्मास्येष्वमुमादित्यं प्रत्यक्षेण कमग्निं चिनुत उपानुवाक्यमाशुमग्निं चिन्वानो मिथूया मिथुनवान्भवत्येकं च ॥ २२ ॥

पुष्पमग्निर्वायुरसौ वै तपश्चन्द्रमा नक्षत्राणि पर्जन्यस्संवथ्सरो योऽप्सु नावमेतद्ध स्म वै सात्रियश्संवथ्सरश्सावित्रममुं नाचिकेतं प्राणाश्श्चातुर्होत्रियं ब्रह्म वैश्वसृजश्शरीरमुपानुवाक्यमाशुमिमान्लोकानिममारुणकेतुकं य एवासौ ॥

---

श्चामुतश्चाव्यतीपाती तं चिनुत इति इमं चामुं च लोकं व्यतीत्य अतिक्रम्य हित्वा यो न गच्छति सर्वगतत्वेन चलितुमशक्यत्वात्तं विश्वात्मानं ईश्वरमिति । प्रश्नप्रतिवचनावसानद्योतनार्थाविति शब्दौ । एवं शाण्डिलमतानुसारेण केचिदस्य सर्वेषु यज्ञक्रतुषु च अङ्गभावमाहुरिति । योऽग्नेरिति । अग्निना मिथुनीभावमात्मन इच्छतीति मिथूया । 'सुप आत्मनः क्यच्' 'अ प्रत्ययात्' इत्यकारप्रत्ययः । ताद्धर्म्यात्ताच्छब्द्यम् । एवं वेदिता मिथुनशक्तिमान् भवति ॥

इत्यारण्यके प्रथमे द्वाविंशोऽनुवाकः.

---



[1]आपो वा इदमासन्थ्सलिलमेव । स प्रजापतिरेकः पुष्करपर्णे समभवत् । तस्यान्तर्मनसि कामस्समवर्तत । इदश्सृजेयमिति । तस्माद्यत्पुरुषो मनसाऽभिगच्छति । तद्वाचा वदति । तत्कर्मणा करोति । तदेषाऽभ्यनूक्ता । [2]कामस्तदग्रे समवर्त-

---

[1]पुनश्चापस्स्तूयन्ते अबीष्टकानामेव वैशिष्ट्यं वक्तुं—आप इति ॥ कार्ये कारणशब्दः । अपां कार्यभूतं इदं परिदृश्यमानं विश्वं जगत् अग्रे सलिलमात्रमेवासीत्

अप एव ससर्जादौ तासु वीर्यमपासृजत् ।*

इति । अथ सः अप्छरीरः प्रजापतिः तदभिमानी हिरण्यगर्भः एकः असहायः पुष्करपर्णे पुष्करपर्णाकारे पुष्टिकारके कस्मिंश्चित् प्रदेशे सलिलमध्ये समभवत् समपद्यत अहमस्मीत्यभ्यमन्यत । अथ तस्य अभिमन्यमानस्य अन्तः मनसि कामः इच्छा समवर्तत उदपद्यत । यदा ह्यभिमन्यते तदैव चान्तर्मन उत्पद्यते तत्रैव चेच्छादय उत्पद्यन्ते । तस्य तु समस्तं जगच्छून्यं पश्यत इदं सृजेयमिति प्रथममिच्छोदपादि । तस्मात् यत्पुरुषः प्रथमं मनसाऽभिगच्छति अभिप्राप्नोति ध्यायति तत् एव वाचा वदति तत् एव कर्मणा करोति तदेव वाक्कर्मभ्यां विवृणोति यथा प्रजापतिना कृतमिति । तत् इदमर्थरूपमभिलक्ष्य इयमृगनूक्ता ॥

[2]कामस्तदग्र इति ॥ एतां[1] च संकल्पवतीमुपदधाति । व्या-

*मनु. १.

[1]एकां.

ताधिं । मनसो रेतः प्रथमं यदासीत् ॥ १० ॥ सतो बन्धुमसति निरविन्दन्न् । हृदि प्रतीष्या कवयो मनीषेति । [3]उपैनं तदुपनमति । यत्कामो भवति । य एवं वेद । [4]स तपोऽतप्यत । स तपस्तप्त्वा । शरीरमधूनुत । तस्य यन्माꣳसमासीत् । ततोऽरुणाः

ख्याता चेयं त्रिष्टुप्—‘जुष्टो दमूनाः’* इत्यत्र । प्रजापतेः अग्रे प्रथमं **कामस्समवर्तत** समपद्यत **यन्मनसः प्रथमं रेतः** कार्यभूतं **आसीत् सतो बन्धुं** व्यक्तसम्बन्धिनं यं कामं **असति** अव्यक्ते **निरविन्दन्** निष्कृष्य लब्धवन्तः हृदये प्रार्थितं[†] **कवयः** मेधाविनः प्रजापतयः प्राणा वा । **मनीषा** मनसः ईशितार इति ॥

[3]**एनं** एवंवेदितारं तत् अभिप्रेतं शीघ्रं **उपनमति** उपसंप्राप्नोति **यत्कामो भवति** यत्काम्यं कामयमानोऽयं भवति । देशकालप्रत्यासत्तिपरौ द्वावुपशब्दौ । ‘शीलिकामि’ इत्यादिना णः, पूर्वपदप्रकृतिस्वरत्वं च ॥

[4]अथ **स** प्रजापतिस्सिसृक्षुः **तपोऽतप्यत** । तपसश्श्रान्ते तं तप्ततपस्कं **शरीरमधूनुत** कंपितवान् । अथ **तस्य** शरीरस्य **यन्मांसं** अरुचिजननं **आसीत्** **ततोऽरुणा**दय **ऋषयः उदतिष्ठन्** उदपद्यन्त । अरुपो जाताः अरुणाः **केतवः** ज्ञानमयाः तप्तशरीरप्रभवत्वात् **वातरशनाः** शुष्कशरीरप्रभवत्वात् वातं शुष्कं रशना शरीरं बन्धनत्वात् । अथ तस्यैव शरीरस्य ये

*आ. २-४-१,

†हृदि हृदये प्रतीष्य निश्चित्य इति माधवीयम्.



केतवो वातरशना ऋषय उदतिष्ठन्न् ॥ ११ ॥ ये नखाः । ते वैखानसाः । ये वालाः । ते वालखिल्याः । यो रसः । सोऽपाम् । [5]अन्तरतः कूर्मं भूतꣳ सर्पन्तम् । तमब्रवीत् । मम वै त्वङ्माꣳसा । समभूत् ॥ १२ ॥ नेत्यब्रवीत् । पूर्वमेवाहमिहासमिति ।

**नखा** आसन् **ते वैखानसा** ऋषयोऽभवन् नखविरूढा वैखानसाः[1] । प्रातिलोम्येन वर्णा वर्तन्ते । अथ **ये वालाः** तस्य शरीरस्य रोमाणि **ते वालखिल्या** ऋषयोऽभवन् वालजाः खिलाः वालखिल्याः । वालत्वेन खिल्यन्त इति वालखिल्याः । यद्वा—वालजत्वेन सौक्ष्म्यात् खिलाः दुर्निरूपाः वालखिल्याः । अथ **यो रसः** तस्मात् शरीरात् विधूननेनैव गळितः स कूर्मोऽभवत् । कुत एतत्? यदाह ‘सोऽपाम् । अन्तरतः कूर्मं भूतं सर्पन्तम् । तमब्रवीत्’ इति ॥

[5]अत्र सः तमिति प्रथमाद्वितीयान्तयोः स्थानविनिमयः । एतदुक्तं भवति—तं **अपामन्तरतः** मध्ये **कूर्मभूतं** कूर्मात्मना संजातं उत्पन्नं **सर्पन्तं** जले प्लवमानं स्वशरीरपरिमाणं[2] स प्रजापतिः **अब्रवीत्** हे कूर्म ! **मम वै** ममैव **त्वङ्मांसा** त्वङ्मांसात् । पूर्ववदाकारः । **समभूत्** समुत्पन्नोसि । पुरुषव्यत्ययः । त्वङ्मांसप्रभवो रसो यः स त्वङ्मांसशब्देनोच्यते । त्वमित्यस्य वा छान्दसो ङकारोन्तादेशः । अथ कूर्मः **नेत्यब्रवीत्** यत्त्वयोक्तं तन्नेत्यर्थः । हेतुमाह—पूर्वमेवाहमिति । यद्वा—मे मांसा त्वं समभूरिति

[1]नखविरूढवैखानसाः.

[2]स्वशरीरपरिणामं स्वपरिणामं वा.